कथ्यते । एतेन च्छातोद्धातेति व्याख्यातम् ॥ साम्प्रतमुषितेति भावयति—

**चरमाए जा दिज्जइ भत्तं विस्सामयंति णं जा वं । ता होइ त्ति सा दूरं च अंतरं तेण वुच्छंमि ॥२३॥**

चरमायां पौरुष्यां सा समागता सा च्छाता ततो यावत्तस्यां चरमायां पौरुष्यां भक्तं दीयते । भक्तानन्तरं च संयत्यस्तां विश्रामयन्ति तावन्निशा भवति । दूरंतरं चा गुरुणामुपाश्रयात् तेन सा तत्रैव संयतीनामुपाश्रये उषिता प्रभाते च गुरुसमीपे नेष्यते ॥

**नाहिंति ममंते तू काइ ना सेज्ज अप्प संकाए । जा उ न नासेज्ज तहिं तं तू गयंबेंति आयरिया ॥२४॥**

प्रभातेऽहं गुरुसमीपे नेष्यते तु गुरवो मां ज्ञास्यन्ति इति विचिन्त्य काचिदात्मशङ्कया नश्येत् । या तु नश्यति तां तत्र गुरुपाश्रये गतामाचार्याणां संयत्यः कथयन्ति । यथैषास्माकमुपाश्रयेऽनेन कारणेनोषिता एतेन वुत्थसाहंतीति व्याख्यातम् ॥ एवं कथिते आचार्यास्तां ब्रुवते किमित्याह—

**न हु कप्पइ दूती वा चोरा अम्हका इ इति वुत्ते । गुरुणानायामि अहं वएज्ज नाहंति वा बूया ॥ २५॥**

न हु नैव कल्पते दूती चौरी चास्माकं काचित् दीचयितुं कल्पते इति गुरुणोक्ते ज्ञाताहमिति विचिन्त्य व्रजेत् । यदि ब्रूयात् नाहं तादृशीति एतेन पूर्वदोषात् चोदयतीति व्याख्यातम् ॥

सम्प्रति रक्खंति नाउं सभावमिति व्याख्येयं । तत्र कथं तस्या भावं लक्षयन्तीत्यत आह—

मातरं भगिनीं दुहितरं वा कथं भूतामित्याह—मेधाविनीं प्रज्ञावतीं ऋजुकामकुटिलां आज्ञप्तां यदुपदिश्यते तस्यै तथैव कारिकां वाचयेदिति योग एतासामसत्यभावे शेषा अपि अस्वजना वाचयेत् । इमा वक्ष्यमाणा मुक्ता ता एवाह—

तरुणिं भोइय मेहुणियं पुव्वहसिय वभिचारिं । एतासु होंति दोसा तम्हा य न वायए तेऊ ॥ २५० ॥

तरुणीं पुराणां पश्चात्कृतव्रतां पुनरभ्युपगतदीक्षां, भोग्यां वेश्यां, मैथुनिकीं भार्यां यथासह पूर्वं सहितमासीत व्यभिचारिणीं पूर्वावस्थां स्वैरिणीं एतासु यस्माद्वाच्यमानासु पूर्वाभ्यासेनात्मपरसमुत्था दोषा भवन्ति तस्मात्तान् न वाचयेत् । अत्रैव विशेषमाह—

वज्जकुड्डसमं चित्तं जइ होज्जाहि दोरहवि । तहावि संकितो होइ पज्जातो वायथंत उ ॥ २५१ ॥

यद्यपि द्वयोरपि वाच्यवाचकयोश्चित्तं वज्रकुड्यसमं तथाप्येता वाचयन् शंकितः शङ्कागोचरो भवति तत एतासां वर्जनम् ।

पूर्वं तु किंटी असतीए मज्झिमा दोसरहिय वाएति । गणहरो अणयरो वावि परिणतो तस्स असतीए ॥ २५२ ॥

पूर्वं तावत् किण्टी वृद्धां वाचयेत् । तस्यामसत्यां दोषरहितो गणहरो मध्यमां वाचयेत् । अथ गणधरः प्रयोजनान्तरेण व्याकुलस्ततस्तस्य गणधरस्यासत्यभावे परिणतोऽन्यतरो वापि वाचयेत् ।

तरुणेसु सयं वाए दोसन्नयरेण वाविजुत्तेसु । विहुणा उ इमेणं तु दव्वादीएण उ जयंतो ॥ २५३ ॥

अथान्यतरः परिणतो न विद्यते, किन्तु सर्वेऽपि तरुणाः वृद्धा अन्यतरेण दोषेण सविकारत्वादिना युक्तास्ततस्तरुणेषु

स्वाध्यायं कुर्वत्याज्ञादय आज्ञाभङ्गादयो दोषास्तथाज्ञां तीर्थकराणां भञ्जति । प्रायश्चित्तं चतुर्गुरु । अनवस्थया अन्येऽपि तथा करिष्यन्तीति, तत्रापि प्रायश्चित्तं चतुर्गुरु, यथा वादी तथाकारी न भवतीति मिथ्यात्वं, तन्निष्पन्नमपि प्रायश्चित्तं चतुर्गुरु, विराधना द्विविधा संयमविराधना आत्मविराधना च । तत्र संयमविराधना ज्ञानाचारविराधना आत्मविराधनायामिदमुदाहरणं तदेवाह—

**मिच्छभयघोसणनिवे दुग्गाणि अतीहमाविणेस्सिहि हा । फिडिया जेउ अतिगया इयरा हयसेसंनिवदंडो**

कस्सवि रन्नो मेच्छा खंधावारोपि सयं आगंतु हणियकामो तं भयं जाणित्ता रण्णा सविसए सयलेवि घोसावियं, मिच्छ खंधावारो आगंतुं विसयं हणिउकामो वट्टति, तास, तुप्मे दुग्गाणि अतीहतत्थ जेहिं / रन्नो आणाकया ते मिच्छ भयातो फिडिया जेहिं न कया आणा तेमिच्छेहिं लुसिया मारिया य जेवि तत्थ केइ परिमुक्का ते वि रण्णा दंडिया ॥ अक्खरयोजना त्वेवम्—म्लेच्छभयमाकर्ण्य नृपेन गाथायां सप्तमी तृतीयार्थे घोषणा कारिता । यथा—दुर्गाण्यतिगच्छथ, आश्रयथ, माविनंक्ष्यथ, तत्र ये अभिगतास्ते म्लेच्छभयात् स्फिटिता इतरे हताः कृतसर्वस्वापहाराश्च कृताः येऽपि शेषाः कथमपि म्लेच्छभयविमुक्तास्तेषामाज्ञाभङ्गकरणतो नृपेण दण्डः कृतः । एष दृष्टान्तोऽयमर्थोपनयः—२७०

**राया इव तित्थगरो जाणवया साहुणो घोषणं सुत्तं । मिच्छाय असज्झातो रयणधणाइं च नाणादी ॥**

अत्र राजा इव तीर्थकरो जनपदा इवं साधवः, घोषणमिव सूत्रम् । म्लेच्छा इव अस्वाध्यायो रत्नधनानीव ज्ञानादीनि । तत्र ये साधवो जनपदस्थानीया राजस्थानीयस्य तीर्थकरस्याज्ञां नानुपालयन्ति ते प्रान्तदेवतया च्छल्यन्ते । प्रायश्चित्तदण्डेन

कालादीनां भूमी प्रत्युपेक्षेत । इयमत्र भावना—उपाश्रयपरिघस्तस्यान्तस्तिस्रो भूमीरुच्चारस्याध्यासितव्याः प्रत्युपेक्षते तद्यथा आसन्ने दूरे मध्ये च तिस्रोऽनध्यासितव्यास्ता अप्येवमेवमेताः परिघस्यान्तः। षट् एवमेव परिघा द्बहिरपि षट् तद्यथा—आसन्न-दूरमध्य भेदतस्तिस्रोऽध्यासितव्यास्तिस्रोऽनध्यासितव्या इति सर्वे संकलनया उच्चार भूमयो द्वादश एवमेव प्रश्रवणस्य द्वादशभूमयस्तिस्रो भूमयः कालस्य तद्यथा—आसन्ने दूरे मध्ये एताश्चोपाश्रयपरिघस्यान्तर्वेदितव्याः। सर्वसंख्यया चतुर्विंशति भूमीः प्रत्युपेक्षते । एतदेवाह—

**अहियासिया य अंतो आसन्ने चेव दूरे मज्झेय । तिण्णेव अणहियासी अंतो छ छच्च बाहिरतो ॥३२४॥**

**एमेवय पासवणा बारस चउवीसतिं तु पेहित्ता । कालस्स य तिण्णि भवे अह सूरो अत्थमुवयाति ॥३२५॥**

अध्यास्या अध्यासनीया उपाश्रयपरिघस्यान्तास्तिस्रो भूमयस्तद्यथा—आसन्ने दूरमध्ये च एवमेव तिस्रो मध्येऽनध्यास्या अध्यासितुमशक्याः सर्वसंख्याया अन्तरुच्चारस्य भूमयः षट् एवमेव षट् परिघाद्बहिरपि सर्वसंकलनया द्वादशोच्चारभूमय एव प्रश्रवणेऽपि द्वादशभूमयः सर्वमीलने चतुर्विंशतिं भूमीः प्रत्युपेक्षते। तदनन्तरं कालस्य तिस्रो भूमयः जघन्येन हस्तान्तरिताः प्रत्युपेक्ष्या भवन्ति । तासु च प्रत्युपेक्षितास्तथानन्तरं सूर्योऽस्तमुपयाति ।

**जइ पुण निव्वाघातो आवस्संतो करेंति सव्वेवि । सड्ढादिकहणवाघाय याए पच्छा गुरू ठंति ॥३२६॥**

सूर्यास्तमयसमये यदि निर्व्याघातं व्याघातस्याभावो गाथायां पुंस्त्वं प्राकृतत्वात्। ततः सर्वेऽपि गुरुप्रभृतय आवश्यकं

पश्यति, । विकृतं नामास्वाभाविकं चेडरूपं च विस्वरं रुदितिच्छिन्द्धि भिन्द्धि मारयेति वा शब्दान् शृणोति । उपलक्षण-मेतत् । इष्टविषयेषु वा विरागमुपगच्छति, तदा कालवधः । एतस्या एव गाथाया व्याख्यानमाह—

गिरहंतस्स उ काले जइ बिंदू तत्थ कोइ निवएज्जा । छीयं व परिणतो वा भावो होज्जा से अन्नत्तो ॥३४९॥

भीतो विभासियाइ भासंतो वावि गेराहइ न सुज्झे । मूढो व दिस ज्झयणे संकियं वावि उवघाओ ॥३५०॥

अन्नं वादिसज्झयणं संकतो होज्जणिट्ठ विसए वा । इट्ठेसु वा विरागं जई वच्चइ तोह तो कालो ॥३५१॥

इदं गाथात्रयमपि व्याख्यातार्थत्वात्सुगमम् ।

जइ उत्तरं अपेहिय गिराहइ सेसाउ ता हतो कालो । तीसु अदीसंतीसु वि तारासु भवे जहन्नेणं ॥३५२॥

यदि उत्तरां दिशमपेच्य शेषादिशः प्राथम्येन गृह्णाति किमुक्तं भवति यदि पूर्वमुत्तराभिमुखो न भवति, । किन्तु शेष-दिगभिमुखस्तदाहतः कालस्तथा यदि जघन्यतस्तिसृषु तारास्वदृश्यमानासु कालं गृह्णाति तदापि हतः कालः ।

वासं च निवडइ जती अहव असज्झाइयं व निवेहेज्जा । एमादीहिं न सुज्झे, तव्विरहंमी भवेसुद्धो ॥३५३॥

यदि वर्षं निपतति अथवा किंचिदस्वाध्यायिकं निपतेत् तदा एवमादिभिरादिशब्दात् यदि कायोत्सर्गेण तिष्ठन् भूमिं न प्रमार्जयति, । च्छिन्नं वा मार्जारादिनापान्तरालं दण्डधरो वा कालग्राहिणो दूरन्यवस्थानस्थितो न युगान्तरमात्र इत्यादि

ततः पुनरन्यत्र स्थानान्तरे गत्वा स्वाध्यायः प्रस्थापनीयः । तत्रापि यदि त्रीन् वारान् कालस्योपघातः स्यात् तत एवमनुना प्रकारेण सर्वं संकलनया नववारानूहते स्वाध्याये प्रथमायां पौरुष्यां न पठन्ति स्वाध्यायम् ।

पट्ठवियंमि सिलोगे घाणा लोया य वज्जणिज्जाओ । सोणियवच्चिक्काणं मुत्तपुरिसाण तहचेव ॥३८५॥

प्रस्थापिते स्वाध्याये भणिते क्षुल्लकाचारकथाद्ये श्लोके स्वाध्यायं कुर्वन्ति कुर्वद्भिश्च स्वाध्यायं शोणित स्तत्रकानां शोणितसूचकानां मूत्रपुरीषाणां च घ्राणालोका वर्जनीयाः । कथमित्याह—

आलोगंमि चिलिमिली गंधे अन्नत्थ गंतु पगरेंति । एसो उ सज्झातो तव्विवरीतो असज्झातो ॥३८६॥

आलोके शोणितादीनामन्तरा चिलिमिली क्रियते । गन्धे पुनरागच्छति अन्यत्र गत्वा स्वाध्यायं कुर्वन्ति । एषोऽनन्तरोदितः सकलदोषविनिर्मुक्तः स्वाध्याये कालः स्वाध्यायः कारणे कार्योपचारात् तद्विपरीतः प्रागुक्तदोष संयुक्तः कालोऽस्वाध्यायः

एएसामन्नयरेऽसज्झाए जो करेइ सज्झायं । सो आणा अणवत्थ मिच्छत्त विराहणं पावे ॥ ३८७ ॥

एतेषामनन्तरोदितानामस्वाध्यायिकानामन्यतरस्मिन्नस्वाध्याये अस्वाध्यायिके सति यः करोति स्वाध्यायं आज्ञाभङ्गं तीर्थकराज्ञाविलोपात् अनवस्थांतं तथा कुर्वन्तमवलोक्यान्यस्यापि तथा करणात् मिथ्यात्वमयथावादकरणात् विराधनां । संयमविराधनां ज्ञानोपचारोपघातात् आत्मविराधनां प्रान्तदेवताच्छलनात् प्राप्नोति । अत्रैवापवादमाह—

बिति आगाढे सागारियादि कालगते असति वुच्छेए । एएसिं कारणेहिं जयणाए कप्पई काउं ॥३८८॥

